Total No. of Questions : 6 Total No. of Printed Pages : 2

**Code No.: MN-03**

# स्नातकपरीक्षाः- २०१५

## बि.ए. - विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम् - अलङ्कारशास्त्रम्

**भागः - २, पत्रिका - ५**

**विषयः - साहित्यदर्पणः - २, काव्यमीमांसा - २**

**दिनाङ्कः** - 7-4-2015 **गरिष्ठाङ्काः** - १००

**समयः** - 10.00 A.M. to 1.00 P.M. Max. Marks - 100

---

**I. एकेन वाक्येन उत्तरयत ।** **10×2=20**

१. वर्णानां प्रतिकुलत्वं नाम किम् ?

२. ''पल्लवाकृतिरक्तोष्ठी'' इत्यत्र दोषः कः ?

३. वाक्यगतस्याविमृष्टविधेयांशस्य उदाहरणं किम् ?

४. अवाचकत्वस्य लक्षणं किम् ?

५. सर्वेषां दोषाणां कस्मिन् प्रसङ्गे दोषत्वं न भवति ?

६. संन्दिग्धत्वं व्याजस्तुतिपर्यवसायि चेत् किं भवति ?

७. निर्हेतुता रव्यातेऽर्थे किं कीदृशी भवति ?

८. नञर्थौ द्वौ कौ ?

९. दोषाणां सामान्यलक्षणं किम् ?

१०. 'योगेन दलिताशयः' इत्यत्र आशयशब्दार्थः कः ?

**II. चतुरो दोषान् सलक्षणोदाहरणं निरूपयत।** **4×5=20**

१. क्लिष्टत्वम् । २. ग्राम्यत्वम् ३. पुनरुक्तता

४. समाप्तपुनरात्तत्वम् ५. न्यूनपदत्वम् ६. सन्दिग्धत्वम्

**III. प्रश्नत्रयमुत्तरयत।** **3×10=30**

१. अविमृष्टविधेयांशभावं दोषं सोदाहरणं प्रतिपादयत ।

२. भग्नप्रक्रमदोषस्य स्वरूपं सोदाहरणं विशदयत ।

३. रसानां परस्परविरोधस्य परिहारः कथम् ? स्फुटयत ।

४. ''गाण्डिवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः'' इत्यत्र वाक्यदोषत्वमाशङ्क्य परिहरत ।

- अनुवर्तते

**IV. कारिकाद्वयं सप्रसङ्गं व्याख्यात।** **2×5=10**

१. वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते ।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ।।

२. विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा।
भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयो ।।

३. क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः ।
अनुभावविभावाभ्यां रचना यत्र नोचिता ।।

**V. एकमुत्तरयत।** **1×10=10**

१. कतिविधाः कवयः ? विवृणुत ।

२. प्रतिभाव्युत्पत्त्योः का श्रेयसी? सोदाहरणं विवृणुत ।

**VI. सप्रसङ्गं श्लोकद्वयं व्याख्यात ।** **2×5=10**

१. अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखं ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रकृतो विदुः ।

२. यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते ।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ।।

३. या दुग्धापि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती ।।

---